# प्रथमः पाठः

# उत्तिष्ठत जाग्रत

प्रियच्छात्राः। अस्माकं भारतं विश्वं कुटुम्बवत् मन्यते। वयम् अतिथीन् देववत् सम्मानयामः। सत्यम् अहिंसा च भारतस्य विशिष्टगुणद्वयम्। सत्यमेव अस्माकम् आदर्शः। वयं भारतीयाः सर्वान् प्राणिनः आत्मवत् पश्यामः। अहिंसा परमो धर्मः। अद्य आवश्यकता अस्ति यद् वयम् अज्ञाननिद्रां परित्यज्य एतानि जीवनमूल्यानि जीवने धारयेम निरन्तरं मानवकल्याणाय उद्यताः भवेम। एष एव धर्मसूत्राणां स्मृतीनाम् उपनिषदां च सन्देशः यः अस्मिन् पाठे सङ्कलितः।

**शब्दार्थः**— **अस्माकम्**—हमारा। **कुटुम्बवत्**—परिवार के समान। **मन्यते**—मानता है। **देववत्**—देवता के समान। **सम्मानयामः**—हम आदर करते हैं। **विशिष्टगुणद्वयम्**—विशिष्ट गुणों का जोड़ा अर्थात् दो विशेष गुण। **प्राणिनः**—प्राणियों को। **आत्मवत्**—अपने समान। **परमः**—श्रेष्ठ। **परित्यज्य**—छोड़कर। **ध्यायेम**—हम धारण करें। **उद्यताः**—तैयार। **उपनिषदाम्**—उपनिषदों का। **संकलितः**—एकत्रित किया गया है।

**सरलार्थ**— प्यारे विद्यार्थियों, हमारा भारत संसार को परिवार के समान मानता है। हम अतिथियों का देवता के समान सम्मान करते हैं। सत्य और हिंसा भारत के दो विशेष गुण हैं। सत्य ही हमारा आदर्श है। हम भारतीय सब प्राणियों का अपनी तरह देखते हैं। हिंसा न करना सबसे बड़ा धर्म होता है। आज आवश्यकता है कि हम अज्ञान की नींद को त्याग कर इन जीवनमूल्यों को जीवन में धारण करें, निरन्तर मानव-कल्याण के लिये तैयार रहें। यही धर्मसूत्रों, स्मृतियों और उपनिषदों का सन्देश है जो इस पाठ में संकलित किया गया है।

**तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता।**
**एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन।।**

**पदच्छेदः**— **तृणानि भूमिः उदकम् वाक् चतुर्थी च सूनृता। एतानि अपि सताम् गेहे न उच्छिद्यन्ते कदाचन।।**

*अन्वयः*— **तृणानि, भूमिः, उदकम्, चतुर्थी च सूनृता वाक्। सताम् गेहे एतानि कदाचन अपि न उच्छिद्यन्ते।**

**भावार्थ**— **सज्जनां गृहेषु अतिथीनां कृते आसनं, वासाय स्थानम्, जलम्, मधुरवाण्या सत्कारः इति भावानाम् कदापि अभावः न भवति। ते सर्वदा अतिथिसत्काराय उद्यताः भवन्ति।**

**शब्दार्थः, पर्यायवाचिशब्दाः टिप्पण्यश्च**— **तृणानि (नपुं०)**—आसनम् (नपुं०) (तृण, प्रथमा, बहुवचनम्), तिनके, तिनकों से बना बैठने का आसन। **भूमिः (स्त्री०)**—आश्रयः (भूमि, प्र०, ए० व०), रहने के लिए स्थान, निवास स्थान। **उदकम् (नपुं०)**—जलम्, पीने के लिए पानी। **चतुर्थी च**—और चौथी। **सुनृता सत्या मधुरा च**—सत्येन माधुर्येण युक्ता, सच तथा मिठास से भरी हुई। **वाक्**—वाणी, बोली, बोलचाल। **सताम्**—सज्जनानाम् (सत्, षष्ठी, बहुवचनम्), अच्छे लोगों के। **गेहे (नपु०)**—गृहे, सप्तमी, घर में। **एतानि**—इमानि एकवचन, ये चारों चीजें। **कदाचन**—कदापि, कभी। **अपि**—अपि, भी। **न**—नहि, नहीं। **उच्छिद्यन्ते**—विनाश्यन्ते, उत्क्षिप्यन्ते, नष्ट होतीं, (उत् + छिद्, लट्, प्र० पु०, बहुवचनम्)।

**सरलार्थ**— सज्जनों के घरों में अतिथियों के लिए आसन, रहने के लिए स्थान, (पीने के लिए) पानी, मधुरवाणी के द्वारा सत्कार (सम्मान)—इन पदार्थों का कभी अभाव (कभी) नहीं होता। वे (सज्जन) सदा अतिथि-सत्कार के लिए तैयार (तत्पर) रहते हैं।

**अद्भिः शुध्यन्ति गात्राणि, बुद्धिः ज्ञानेन शुध्यति।**
**अहिंसया च भूतात्मा मनः सत्येन शुध्यति।।**

**पदच्छेदः**— **अद्भिः शुध्यन्ति गात्राणि, बुद्धिः ज्ञानेन शुध्यति। अहिंसया च भूतात्मा, मनः सत्येन शुध्यति।।**

गात्राणि अद्भिः शुध्यन्ति, बुद्धिः ज्ञानेन शुध्यति, भूतात्मा च अहिंसया (शुध्यति), मनः सत्येन शुध्यति।

**अन्वयः—** गात्राणि अद्भिः शुध्यन्ति, बुद्धिः ज्ञानेन शुध्यति, भूतात्मा च अहिंसया (शुध्यति), मनः सत्येन शुध्यति। यथा यथा च वयं ज्ञानं

**भावार्थ—** अस्माकम् शरीरम् जलेन स्वच्छं पवित्रं भवति, अस्माकं बुद्धिः ज्ञानेन शुद्धा भवति, सत्यस्य आचरणेन मनः पवित्रम् भवति।।

प्राप्नुमः, अस्माकं बुद्धिः पवित्रा भवति, मनुष्यस्य आत्मा अहिंसया शुद्धः भवति, सत्यस्य आचरणेन मनः पवित्रम् भवति।। **अद्भिः—**जलैः (अप्,

**शब्दार्थः, पर्यायवाचिशब्दाः टिप्पण्यश्च— गात्राणि—**शरीराणि (गात्र, प्रथमा बहुवचनम्), शरीर, अंग। **शुध्यन्ति—**शुद्धानि भवन्ति (शुध्, लट्, प्र० पु०, पवित्रं भवति, बहुवचनम्), शुद्ध होते हैं, पवित्र

तृतीया, बहुवचनम्), पनियों से। **शुध्यन्ति—**शुद्धानि भवन्ति (शुध्, लट्, प्र० पु०, पवित्रं भवति, बहुवचनम्), शुद्ध होते हैं, पवित्र होता है। **बुद्धिः—**विचारः, बुद्धिः, बुद्धि, विचार। **ज्ञानेन—**ज्ञान द्वारा, ज्ञान के द्वारा। **शुध्यति—**पवित्रा भवति (शुध्, लट् लकार, प्र० पु०, एकवचनम्), पवित्र होती है। **भूतात्मा च—**जीवात्मा (भूतानाम् आत्मा च षष्ठी बहुवचनम्), जीवात्मा, आत्मा। **अहिंसया—**अहिंसा-माध्यमेन (अहिंसा, तृतीया, एकवचनम्), अहिंसा के द्वारा। **मनः—**मनः, संकल्प-आश्रयः, संकल्पों का आश्रय, मन। **सत्येन—**सत्यवचनेन, सत्यव्यवहारेण (सत्य, तृतीया, एकवचनम्), सच बोलने से, सही व्यवहार से।

**सरलार्थ—** हमारा शरीर जल से स्वच्छ पवित्र होता है, हमारी बुद्धि ज्ञान से शुद्ध होती है, और जैसे-जैसे हम ज्ञान प्राप्त करते हैं, हमारी बुद्धि पवित्र हो जाती है। मनुष्य की आत्मा अहिंसा से पवित्र (शुद्ध) होती है, सत्य के आचरण से मन पवित्र होता है।

**सत्यमेव जयति नानृतम्,**
**सत्येन पन्था विततो देवयानः।**
**येनाक्रमन्त्यृषयो ह्याप्तकामाः,**
**यत्र तत् सत्यस्य परमं निधानम्।।**

**पदच्छेदः— सत्यम् एव जयति न अनृतम्, सत्येन पन्थाः विततः देवयानः। येन आक्रमन्ति ऋषयः हि आप्तकामाः, यत्र तत् सत्यस्य परमम् निधानम्।।**

**अन्वयः— सत्यम् एव जयति अनृतम् न। देवयानः पन्थाः सत्येन विततः। आप्तकामाः ऋषयः येन अत्र आक्रमन्ति तत् हि सत्यस्य परमम् निधानम्।।**

**भावार्थ— सत्यस्य एव सर्वदा जयः भवति, अनृतम् असत्यं कदापि अन्ते जयं न आप्नोति। महापुरुषाणां मार्गः सत्येन एव परिपूर्णः। सफलमनोरथाः ऋषयः येन मार्गेण गच्छन्ति यत्र च प्राप्नुवति सः मार्गः सत्यस्य एव मार्गः, सत्यस्य परमम् धाम तदेव।**

**शब्दार्थः, पर्यायवाचिशब्दाः टिप्पण्यश्च— सत्यम्—**सत्यम्, सच। **एव—**एव, ही। **जयति—**जयते, विजयं प्राप्नोति, जय को प्राप्त करता है। **अनृतम्—**असत्यम् (न ऋतम्), झूठ। **न—**नहि, नहीं। **देवयानः—**देवानां यानः (महापुरुषाणां मार्गः), देवताओं, महापुरुषों का मार्ग। **पन्थाः—**मार्गः (पथिन्, पु०, प्र०, ए०व०), मार्ग। **सत्येन—**सत्य द्वारा, सत्य के द्वारा। **विततः—**विस्तृतः, परिपूर्ण (वि + तन् + क्त), फैला हुआ, भरा हुआ। **आप्तकामाः (आप्ताः कामाः ते यैः)—**कृतकृत्याः, सफलमनोरथयुक्ताः, जिनके मनोरथ पूरे हो गए हैं वे। **ऋषयः—**मन्त्रद्रष्टारः, ऋषि लोग, मन्त्रद्रष्टा। **येन—**येन मार्गेण, जिस रास्ते से। **अत्र—**अस्मिन् स्थाने, इस स्थान पर। **आक्रमन्ति—**गच्छन्ति (आ + क्रम, लट्, प्र० पु०, बहुवचनम्), जाते हैं। **तत्—**सः मार्ग, असौ एव, तदेव, वह ही, वही। **हि—**एव, निश्चयेन, ही, निश्चय से। **सत्यस्य—**सत्यस्य, तत्त्वस्य, सत्य का। **परमम्—**महत्, महत्तमम्, बड़ा, सबसे बड़ा। **निधानम्—**धाम (नि + धा + ल्युट्), स्थान।

**सरलार्थ—** सत्य की ही सदा जीत होती है। झूठ (जो सच या ऋत-शाश्वत नहीं है) कदापि अन्त में विजय प्राप्त नहीं करता। जिनके मनोरथ सफल (पूर्ण) हो गए हैं, ऐसे ऋषि जिस मार्ग से जाते हैं और जहाँ पर पहुँचते हैं, वह मार्ग सत्य का ही मार्ग है, सत्य का सबसे बड़ा स्थान (आश्रय) वही है।

**यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति,**
**सर्वभूतेषु चात्मानम् ततो न विजुगुप्सते।।**

**पदच्छेदः— यः तु सर्वाणि भूतानि आत्मनि एव अनुपश्यति, सर्वभूतेषु च आत्मानम् ततः न विजुगुप्सते।।**

***अन्वयः*— यः तु सर्वाणि भूतानि आत्मनि एव अनुपश्यति, सर्वभूतेषु च आत्मानम् (अनुपश्यति) ततः न विजुगुप्सते।**

**भावार्थ— यः मनुष्यः सर्वान् प्राणवतः जनान् स्वकीये हृदये पश्यति, सर्वान् आत्मवत् पश्यति, सर्वे जनाः मत्सदृशाः एव, सर्वेषु स एव आत्मा विराजते यः मयि इति यदा ज्ञान भवति, तत्पश्चात् सः केनापि सह घृणां न शक्नोति, सर्वेषां रक्षणे परोपकरणे च उद्यतः भवति।**

शब्दार्थः, पर्यायवाचिशब्दाः टिप्पण्यश्च— **यः**—यः मनुष्यः, प्राणी, जो मनुष्य/प्राणी। **तु**—निश्चयेन, निश्चय से। **सर्वाणि**—सम्पूर्णानि, अखिलानि (सर्व, द्वितीया, बहुवचनम्), समस्त। **भूतानि**—मनुष्यान् प्राणिनः (भूत, द्वितीया, बहुवचनम्), मनुष्यों/प्राणियों को। **आत्मनि**—आत्म-मध्ये, निजे अन्तः करणे, स्वकीये, हृदये (आत्मन्, सप्तमी, एकवचनम्), आत्मा में, अपने हृदय में। **एव**—एव, ही। **अनुपश्यति**—अन्वीक्षणं करोति, पश्यति (अनु + √दृश्, लट्, प्र०पु०, एकवचनम्), देखता है। **सर्वभूतेषु**—सर्वेषु प्राणिषु, सर्वेषु मनुष्येषु (सर्वभूत, सप्तमी, बहुवचनम्), सब प्राणियों में। **च**—तथा, और। **आत्मानम्**—(अनुपश्यति) निजम् (आत्मन्, द्वितीया, एकवचनम्, स्वरूपम्), अपने-आप को देखता है। **ततः**—तदनन्तर, तस्मात् परं, उसके बाद (वह)। **न**—नहि, नहीं। **विजुगुप्सते**—घृणां करोति (वि, √गुप् + सन्, लट्, एकवचनम्), घृणा करता है।

सरलार्थ— जो व्यक्ति सब प्राणधारी जीवों को अपने हृदय में देखता है, अर्थात् सबको अपने समान देखता है, सब लोग मेरे जैसे एक हैं, सबमें वह ही आत्मा विराजमान है जो मुझमें है इस प्रकार का ज्ञान रखता है, इस प्रकार की अनुभूति करने लगता है, वह मनुष्य किसी के साथ घृणा नहीं कर सकता। वह सबकी रक्षा में तथा परोपकार में सदा उद्यत रहता है।



**उत्तिष्ठत, जाग्रत, प्राप्य वरान् निबोधत।**
**क्षुरस्य धारा निशिता दुरत्यया,**
**दुर्गं पथस्तत् कवयो वदन्ति।।**

पदच्छेदः— **उत्तिष्ठत, जाग्रत, प्राप्य, वरान् निबोधत। क्षुरस्य धारा निशिता, दुरत्यया, दुर्गम् पथः तत् कवयः वदन्ति।।**

*अन्वयः*— **उत्तिष्ठत, जाग्रत, वरान् प्राप्य निबोधत। क्षुरस्य धारा निशिता दुरत्याय। कवयः तत् पथः दुर्गम् वदन्ति।**

भावार्थ— **हे जनाः! यूयं ज्ञानं प्राप्तुं तत्पराः उद्यताः भवत। अज्ञाननिद्रां त्यक्त्वा उत्तिष्ठत। महापुरुषाणां समीपे गत्वा ज्ञानं प्राप्तुं प्रयत्नं कुरुत। ज्ञानमार्गः सरलः नास्ति। छुरिकायाः धारा यथा तीक्ष्णा, पद्भ्याम् गन्तुम् अशक्या भवति तथैव महापुरुषाः ज्ञानस्य मार्गम् अतीव कठिनम् इति वर्णयन्ति। तर्हि एकाग्रमनसा ध्यानेन सन्मार्गम् आश्रित्य चलत।**

शब्दार्थः, पर्यायवाचिशब्दाः टिप्पण्यश्च— **उत्तिष्ठत**—ज्ञानाय प्रयत्नं कुरुत (उत् + स्था, लोट्, म० पु०, बहुवचनम्), ज्ञानार्थ प्रयत्न करो। **जाग्रत**—जागृत, अज्ञानस्य निद्रां त्यजत (वैदिक प्रयोग) (लोट्, म० पु०, बहुवचनम्), अज्ञान की नींद को छोड़ो। **वरान्**—श्रेष्ठान् जनान् (वर, द्वितीया, बहुवचनम्), श्रेष्ठ पुरुषों के। **प्राप्य**—गृहीत्वा, प्र + आप् + ल्यप्, समीप पाकर। **निबोधत**—जानीत, (नि, बुध, लोट्, म०पु०, बहुवचनम्), जानो। **क्षुरस्य**—छुरिकायाः (क्षुर, पु०, षष्ठी, एकवचनम्), छुरिका की। **धारा**—धारा, धार। **निशिता**—तीक्ष्णा, तीखी। **दुरत्यया**—दुःखे गन्तुम् शक्या (दुः + अति + अया), कष्टपूर्वक जाने योग्य। **कवयः**—विद्वांसः, (कवि, प्रथमा, बहुवचनम्), विद्वान लोग। **तत् (नपुं०)**—अदः, उपर्युक्तम्, उस (उपर्युक्त)। **पथः (नपुं०)**—मार्गम्, (पथः वैदिक प्रयोगः), मार्ग को। **दुर्गम् (नपुं०)**—कठिनम्, कठिन। **वदन्ति**—कथयन्ति, वर्णयन्ति। (वद्, लट्, प्र० पु०, बहुवचनम्), वर्णन करते हैं।

सरलार्थ— हे लोगो! तुम सब ज्ञान को पाने के लिए तैयार हो जाओ। अज्ञान की नींद को छोड़कर उठो। महापुरुषों के पास जाकर ज्ञान प्राप्त करने का प्रयत्न करो। ज्ञानमार्ग सरल नहीं है। जैसे छुरिका (छुरी) की धार तीक्ष्ण होती है, उस पर पैदल नहीं चला जा सकता, वैसे ही महापुरुष—**'ज्ञान का मार्ग बहुत कठिन है'** —ऐसा वर्णन करते हैं। तो एकाग्र मन से ध्यानपूर्वक सन्मार्ग का आश्रय (सहारा) लेकर चलो।

## अनुप्रयुक्त-व्याकरणम्

पाठाधारिताः सन्धिविच्छेदाः

| | | | | | |
|---|---|---|---|---|---|
| **प्रियच्छात्राः** | = | प्रिय + छात्राः | **एष एव** | = | एषः + एव |
| **संकलितः** | = | सम् + कलितः | **भूमिरुदकम्** | = | भूमिः + उदकम् |
| **एतान्यपि** | = | एतानि + अपि | **नोच्छिद्यन्ते** | = | न + उच्छिद्यन्ते |
| **उच्छिद्यन्ते** | = | उद् + छिद्यन्ते | **भूतात्मा** | = | भूत + आत्मा |
| **सत्यमेव** | = | सत्यम् + एव | **नानृतम्** | = | न + अनृतम् |
| **पन्था विततः** | = | पन्थाः + विततः | **विततो देवयानः** | = | विततः + देवयानः |

| | | |
|---|---|---|
| येनाक्रमन्ति | = | येन + आक्रमन्ति |
| ऋषयो हि | = | ऋषयः + हि |
| यस्तु | = | यः + तु |
| आत्मन्येव | = | आत्मनि + एव |
| चात्मानम् | = | च + आत्मानम् |
| उत्तिष्ठत | = | उद् + तिष्ठत |
| पथस्तत् | = | पथः + तत् |
| आक्रमन्त्यृषयः | = | आक्रमन्ति + ऋषयः |
| ह्याप्तकामाः | = | हि + आप्तकामाः |
| भूतान्यात्मनि | = | भूतानि + आत्मनि |
| एवानुपश्चति | = | एव + अनुपश्यति |
| ततो न | = | ततः + न |
| दुर्गंपथः | = | दुर्गम् + पथः |
| कवयो वदन्ति | = | कवयः + वदन्ति |

पाठाधारिताः समासविग्रहाः

| समस्तपदानि | विग्रहाः | समासः-नाम |
|---|---|---|
| प्रियच्छात्राः | प्रियाः च ते छात्राः, तत्सम्बुद्धौ | कर्मधारयः |
| आज्ञाननिद्राम् | अज्ञानस्य निद्रा, ताम् | षष्ठी तत्पुरुषः |
| जीवन-मूल्यानि | जीवनस्य मूल्यानि | षष्ठी तत्पुरुषः |
| मानव-कल्याणाय | मानवानाम् कल्याणम्, तस्मै | षष्ठी तत्पुरुषः |
| अहिंसया | न हिंसा अहिंसा, तया | नञ् तत्पुरुषः |
| अनृतम् | न ऋतम् | नञ् तत्पुरुषः |
| आप्तकामाः | आप्ताः कामाः यैः ते | बहुव्रीहीः |
| सर्वभूतेषु | सर्वाणि भूतानि सर्वभूतानि, तेषु | कर्मधारयः |

## अनुप्रयोगस्य प्रश्नोत्तराणि

**प्रश्न 1. अधोलिखिताः पंक्तीः मेलयत —**

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (*i*) अद्भिः गात्राणि शुध्यन्ति | (क) सत्येन पन्था विततो देवयानः। |
| (*ii*) सत्यमेव जयति नानृतम् | (ख) वाक् चतुर्थी च सूनृता। |
| (*iii*) उत्तिष्ठत जाग्रत | (ग) ततो न विजुगुप्सते। |
| (*iv*) तृणानि भूमिरुदकं | (घ) निशिता दुरत्यया। |
| (*v*) सर्वभूतेषु चात्मानम् | (ङ) बुद्धिः ज्ञानेन शुध्यति। |
| (*vi*) अहिंसया च भूतात्मा | (च) कवयो वदन्ति। |
| (*vii*) क्षुरस्य धारा | (छ) मनः सत्येन शुध्यति। |
| (*viii*) दुर्गं पथस्तत् | (ज) प्राप्त वरान् निबोधत। |

**उत्तरम्—**

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (*i*) अद्भिः गात्राणि शुध्यन्ति | (ङ) बुद्धिः ज्ञानेन शुध्यति। |
| (*ii*) सत्यमेव जयति नानृतम् | (क) सत्येन पन्था विततो देवयानः। |
| (*iii*) उत्तिष्ठत जाग्रत | (ज) प्राप्त वरान् निबोधत। |
| (*iv*) तृणानि भूमिरुदकं | (ख) वाक् चतुर्थी च सूनृता। |
| (*v*) सर्वभूतेषु चात्मानम् | (ग) ततो न विजुगुप्सते। |
| (*vi*) अहिंसया च भूतात्मा | (छ) मनः सत्येन शुध्यति। |
| (*vii*) क्षुरस्य धारा | (घ) निशिता दुरत्यया। |
| (*viii*) दुर्गं पथस्तत् | (च) कवयो वदन्ति। |

**प्रश्न 2. विलोमपदानि मेलयत—**

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (i) हिंसया | (क) कुण्ठिता |
| (ii) उपविशत | (ख) सुगमम् |
| (iii) निशिता | (ग) अज्ञानेन |
| (iv) दुर्गम् | (घ) अहिंसया |
| (v) सत्यम् | (ङ) सङ्कुचितः |
| (vi) ज्ञानेन | (च) उत्तिष्ठत |
| (vii) विततः | (छ) स्वपित |
| (viii) जाग्रत | (ज) अनृतम् |

उत्तरम्—

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (i) हिंसया | (घ) अहिंसया |
| (ii) उपविशत | (च) उत्तिष्ठत |
| (iii) निशिता | (क) कुण्ठिता |
| (iv) दुर्गम् | (ख) सुगमम् |
| (v) सत्यम् | (ज) अनृतम् |
| (vi) ज्ञानेन | (ग) अज्ञानेन |
| (vii) विततः | (ङ) सङ्कुचितः |
| (viii) जाग्रत | (छ) स्वपित। |

**प्रश्न 3. कर्तृपदैः सह क्रियापदानि योजयत—**

| | |
|---|---|
| (i) गात्राणि अद्भिः | ............................ । |
| (ii) यूयम् सर्वे वरान् प्राप्य | ............................ । |
| (iii) सत्यम् एव | ............................ । |
| (iv) कवयः तत् मार्गं दुर्गं | ............................ । |
| (v) एतानि सज्जनानां गृहेषु कदापि न | ............................ । |
| (vi) बुद्धिः ज्ञानेन | ............................ । |
| (vii) आत्मवत् सर्वान् दृष्ट्वा नरः न | ............................ । |

उत्तरम्—

| | |
|---|---|
| (i) गात्राणि अद्भिः | शुध्यन्ति। |
| (ii) यूयम् सर्वे वरान् प्राप्य | निबोधत। |
| (iii) सत्यम् एव | जयति। |
| (iv) कवयः तत् मार्गं दुर्गं | वदन्ति। |
| (v) एतानि सज्जनानां गृहेषु कदापि न | उच्छिद्यन्ते। |
| (vi) बुद्धिः ज्ञानेन | शुध्यति। |
| (vii) आत्मवत् सर्वान् दृष्ट्वा नरः न | विजुगुप्सति। |

**प्रश्न 4. सन्धिच्छेदमधिकृत्य अधोलिखितां तालिकां पूरयत—**

| | | | |
|---|---|---|---|
| (i) न + अनृतम् | = | नानृतम् | (अ + अ = आ) |
| (ii) विततः + देवयानः | = | विततो देवयानः। | (अः + द = : → उ, अ + उ– = ओ) |
| (iii) आक्रमन्ति + ऋषयः | = | ................... | (इ + ऋ = इ → य् = यृ) |

| | | | | |
|---|---|---|---|---|
| (*iv*) | हि + आप्तकामाः | = | ह्याप्तकामाः। | (इ + आ = इ → − = ह्या) |
| (*v*) | भूमिः + उदकम् | = | भूमि............... । | (: + उ = : → − = रु) |
| (*vi*) | पथः + तत् | = | पथ................ । | (: + त = : → − = स्त) |
| (*vii*) | भूतानि + आत्मनि | = | भूतान्............... । | (इ + आ = इ → − = न्या) |
| (*viii*) | आत्मनि + एव | = | आत्मन्............ । | (इ + ए = इ → − = न्ये) |
| (*ix*) | एव + अनुपश्यति | = | एवानुपश्यति। | (अ + अ = − = वा) |
| (*x*) | च + आत्मानम् | = | ..................... । | (अ + आ = − = चा) |
| (*xi*) | न + उच्छिद्यन्ते | = | न..................... । | (अ + अ = − = नो) |

उत्तरम्—

| | | | | |
|---|---|---|---|---|
| (*i*) | न + अनृतम् | = | नानृतम् | (अ + अ = आ) |
| (*ii*) | विततः + देवयानः | = | विततो देवयानः। | (अ + द = : → उ, अ + उ = ओ) |
| (*iii*) | आक्रमन्ति + ऋषयः | = | आक्रन्त्यृषयः। | (इ + ऋ = इ → य् = यृ) |
| (*iv*) | हि + आप्तकामाः | = | ह्याप्तकामाः। | (इ + आ = इ → − = ह्या) |
| (*v*) | भूमिः + उदकम् | = | भूमिरुदकम्। | (: + उ = : → − = रु) |
| (*vi*) | पथः + तत् | = | पथस्तत्। | (: + त = : → − = स्त) |
| (*vii*) | भूतानि आत्मनि | = | भूतान्यात्मान। | (इ + आ = इ → − = न्या) |
| (*viii*) | आत्मनि + एव | = | आत्मन्येन। | (इ + ए = इ → − = न्ये) |
| (*ix*) | एव + अनपश्यति | = | एवानुपश्यति। | (अ + अ = − = वा) |
| (*x*) | च + अत्मानम् | = | चात्मानम् | (अ + आ = − = चा) |
| (*xi*) | न + उच्छिद्यन्ते | = | नोच्छिद्यन्ते | (अ + अ = − = नो) |

**प्रश्न 5.** (*i*) **अत्र कुत्र तृतीया विभक्तिः न अस्ति।**

अद्भिः, सत्येन, अहिंसया, निशिता

(*ii*) **अत्र कुत्र षष्ठीबहुवचनम् अस्ति**?

क्षुरस्य, सत्यस्य, सताम्, कवयः।

(*iii*) **एतेषु किम् अव्ययपद्म न अस्ति**?

ततः, कदाचन, वाक्, एव।

(*iv*) **एतेषु किं क्रियापदम् न अस्ति**?

विततः, उच्छिद्यन्ते, उत्तिष्ठत, विजुगुप्सते।

(*v*) **एतेषु किं क्रियापदम् बहुवचने न अस्ति**?

आक्रमन्ति, वदन्ति, निबोधत, अनुपश्यति।

उत्तरम्— (*i*) **निशिता** — अत्र तृतीया विभक्तिः न अस्ति।

(*ii*) **कवयः** — अत्र षष्ठी बहुवचनम् न अस्ति।

(*iii*) **वाक्** — अत्र अव्ययपदम् न अस्ति।

(*iv*) **विततः** — इदं क्रियापदम् न अस्ति।

(*v*) **अनुपश्यति** — क्रियापदं बहुवचने नास्ति।

**प्रश्न 6. अधोलिखितसूक्तिभिः सह सम्बद्धा पंक्तिं मेलयत—**

| सूक्तिः | पंक्तिः |
|---|---|
| (*i*) आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः | (क) मनः सत्येन शुध्यति। |
| (*ii*) वाण्येका समलङ्करोति पुरुषम्। | (ख) उत्तिष्ठत, जाग्रत। |

| | |
|---|---|
| (iii) अमेध्यो (अपवित्रः) वै पुरुषः यः अनृतं वदति। | (ग) अद्भिः (जलैः) शरीराणि शुध्यन्ति। |
| (iv) नास्ति अहिंसापरं सुखम्। | (घ) सर्वभूतेषु चात्मानं ततो न विजुगुप्सते। |
| (v) उत्तिष्ठत, मा स्वपत। | (ङ) प्राप्य वरान् निबोधत। |
| (vi) आपः सर्वस्य भेषजीः। | (च) सत्येन पन्थाः विततो देवयानः। |
| (vii) गुरुप्रसादात् सर्वं तु प्राप्नोत्येव न संशयः | (छ) सतां गेहे सूनृता वाक् प्रयुज्यते। |
| (viii) सत्यमया उ देवाः | (ज) आत्मा अहिंसया शुध्यति। |

उत्तरम्—

| सूक्तिः | पंक्तिः |
|---|---|
| (i) आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः | (घ) सर्वभूतेषु चात्मानं ततो न विजुगुप्सते। |
| (ii) वाण्येका समलङ्करोति पुरुषम्। | (छ) सतां गेहे सूनृता वाक् प्रयुज्यते। |
| (iii) अमेध्यो (अपवित्रः) वै पुरुषः यः अनृतं वदति। | (क) मनः सत्येन शुध्यति। |
| (iv) नास्ति अहिंसापरं सुखम्। | (ज) आत्मा अहिंसया शुध्यति। |
| (v) उत्तिष्ठत, मा स्वपत। | (ख) उत्तिष्ठत, जाग्रत। |
| (vi) आपः सर्वस्य भेषजीः। | (ग) अद्भिः (जलैः) शरीराणि शुध्यन्ति। |
| (vii) गुरुप्रसादात् सर्वं तु प्राप्नोत्येव न संशयः | (ङ) प्राप्य वरान् निबोधत। |
| (viii) सत्यमया उ देवाः | (च) सत्येन पन्थाः विततो देवयानः। |

**प्रश्न 7. पाठं पठित्वा अशुद्धं तथ्यं चिनुत—**

(i) अतिथये आसनम्, जलम् च दातव्यम्।
(ii) सत्यस्य एव अन्ते जयः भवति।
(iii) आत्मा हिंसया दूष्यते।
(iv) वसुधैव कुटुम्बकम् इति ज्ञात्वा नरः घृणां करोति।
(v) ऋषयः सत्यस्य मार्गे चलन्ति।
(vi) ज्ञानमार्गः अतीव सरलः।
(vii) वयम् अज्ञाननिद्रां त्यक्तवा उत्तिष्ठाम्।
(viii) ज्ञानिनां समीपे गत्वा ज्ञानं प्राप्तव्यम्।
(ix) सज्जनानां गृहे मधुरवचनानाम् अभावः भवति।
(x) यदा वयं सत्यं वदामः तदा अस्माकं मनः पवित्रम् भवति।

उत्तरम्— (iv) वसुधैव कुटुम्बकम् इति ज्ञात्वा नरः घृणां करोति।
(vi) ज्ञानमार्गः अतीव सरलः।
(ix) सज्जनानां गृहे मधुरवचनानाम् अभावः भवति।

**प्रश्न 8. अधोलिखितानां पदानां स्थाने पाठे किं पदं प्रयुक्तम्**

| | | |
|---|---|---|
| यथा—तीक्ष्णा | = | निशिता |
| (i) घृणां न करोति | = | |
| (ii) आसनम् | = | |
| (iii) पदन्यासं कुर्वन्ति | = | |
| (iv) जानीत | = | |
| (v) शरीराणि | = | |
| (vi) दुःखेन गन्तुम शक्या | = | |
| (vii) प्रियं हितकरम् (वचनम्) | = | |

=

(viii) मार्गः =

(ix) असत्यम् =

(x) जलम् =

**उत्तरम्—**

(i) घृणां न करोति = विजुगुप्सते

(ii) आसनम् = तृणानि

(iii) पदन्यासं कुर्वन्ति = आक्रमन्ति

(iv) जानीत = निबोधत

(v) शरीराणि = गात्राणि

(vi) दुःखेन गन्तुम शक्या = दुरत्यया

(vii) प्रियं हितकरम् (वचनम्) = सूनृतम्

(viii) मार्गः = पन्थाः

(ix) असत्यम् = अनृतम्

(x) जलम् = उदकम्

**प्रश्न 9. रिक्तस्थानानि पूरयत—**

वाक्यानि

(i) बुद्धिः....................शुध्यति।

(ii) आद्भिः..................शुध्यन्ति।

(iii) ...............आत्मानं दृष्ट्वा घृणां न करोति।

(iv) ....................गेहे अतिथिभ्यः सर्वदा आसनं जलं, स्थानं मधुरवचनानि विराजन्ते।

(v) ........................सत्यमार्गम् आश्रयन्ति।

**उत्तरम्—** (i) बुद्धिः **ज्ञानेन** शुध्यति।

(ii) आद्भिः **गात्राणि** शुध्यन्ति।

(iii) **सर्वभूतेषु** आत्मानं दृष्ट्वा घृणां न करोति।

(iv) **सताम्** गेहे अतिथिभ्यः सर्वदा आसनं जलं, स्थानं मधुरवचनानि विराजन्ते।

(v) **आप्तकामाः ऋषयः** सत्यमार्गम् आश्रयन्ति।

**प्रश्न 10. अधोलिखितविशेष्यैः सह विशेषणानि विशेष्याणि वा योजयत**

| | विशेषणानि | **विशेष्याणि** |
|---|---|---|
| (i) | सूनृता | वाक् |
| (ii) | आप्तकामाः | ............... |
| (iii) | ................ | निधानम् |
| (iv) | दुर्गम् | ............... |
| (v) | निशिता | ............... |
| (vi) | .............. | भूतानि |
| (vii) | सर्वेषु | ............... |
| (viii) | विततः | ............... |
| (ix) | चतुर्थी | ............... |
| (x) | दुरत्यया | ............... |

उत्तरम्—

| विशेषणानि | विशेष्याणि |
|---|---|
| (*i*) सूनृता | वाक् |
| (*ii*) आप्तकामाः | **ऋषयः** |
| (*iii*) **परमं** | निधानम् |
| (*iv*) दुर्गम् | **पथः** |
| (*v*) निशिता | **धारा** |
| (*vi*) **सर्वाणि** | भूतानि |
| (*vii*) सर्वेषु | **भूतेषु** |
| (*viii*) विततः | **पन्थाः** |
| (*ix*) चतुर्थी | **वाक्** |
| (*x*) दुरत्यया | **धारा** |

## पाठ-विकासः

**क. सन्दर्भ-ग्रन्थपरिचयः**

**अस्माकं वैदिकवाङ्मयम् अत्यन्त विस्तृतम् अस्ति। वेदाः, उपनिषदः, ब्राह्मणग्रन्थाः, आरण्यक-ग्रन्थाः, स्मृतयः, वेदाङ्गानि धर्मसूत्राणि इत्यादयः। अस्मिन् पाठे उपनिषद्भ्यः, धर्मसूत्रात् मनुस्मृतेः च पद्यानि संकलितानि।**

**उपनिषदः प्रमुखाः उपनिषदः एकादश सन्ति, ईश, केन, कठ, प्रश्न, मुण्डक, माण्डूक्य छान्दोग्य, ऐतरेय, तैत्तिरीय, बृहदारण्यक, श्वेताश्वतरः च।**

**सन्दर्भाः (1) तृणानि भूमि : .......... इति पद्यं मनुस्मृतेः उद्धृतम्। मनुस्मृतिः अस्माकं प्राचीनतमं संविधानम् अस्ति। तत्र द्वादश अध्यायाः सन्ति। अद्भि गात्राणि इति पद्यं बौधयनधर्मसूत्रात् संकलितम्। कल्पसूत्राणि, श्रौतसूत्राणि, गृह्यसूत्राणि, शुल्वसूत्राणि धर्मसूत्राणि च प्रसिद्धाः सूत्रग्रन्थाः। धर्मसूत्रेषु नीतेः, सदाचारस्य, शासनव्यवस्थायाः, प्रजानाम् अधिकाराणा कर्तव्यानां, सामाजिक-आचारविचारविषये सामाजिकव्यवस्थाविषये च सूत्राणि सन्ति। स्वयं बुभुक्षिताः भूत्वा अपि सेवकाय भोजनं दात्वयम् इति आदिशति आपस्तम्बीय-धर्मसूत्रम् (259)। शुल्वसूत्रेषु रेखागणितस्य सिद्धान्ताः वर्णिताः।**

**(2) यस्तु सर्वाणि.... इति ईशोपनिषदः मन्त्रः। ईशोपनिषद् यजुर्वेदस्य चत्वारिंशत्तमः अध्यायः।**

**(3) सत्यमेव.... इति मुण्डकोपनिषदः सङ्गृहीतः। एषः एव अस्माकं राष्ट्रियलक्ष्यं 'सत्यमेव जयते।'**

**(4) उत्तिष्ठत.... कठोपनिषदः समुद्धृतः एषः मन्त्रः राष्ट्रस्य सर्वेषां नागरिकाणां प्रति एव आह्वानम्। स्वामिविवेकानन्देन इदं राष्ट्रियवाक्यमिव स्वीकृतम् आसीत्।**

**(क) संदर्भ-ग्रन्थ परिचय**

हमारा वैदिक साहित्य अत्यंत विस्तृत है। वेद, उपनिषद्, ब्राह्मण ग्रन्थ, आरण्यक ग्रन्थ, स्मृतियाँ, वेदाङ्ग धर्मसूत्र इत्यादि। इस पाठ में उपनिषदों में तथा धर्मसूत्र व मनुस्मृति से पद्य संकलित किए गए हैं—

**उपनिषद्**—प्रमुख उपनिषद् 11 हैं—(1) ईश (2) केन (3) कठ (4) प्रश्न (5) मुण्डूक (6) माण्डूक्य (7) छान्दोग्य (8) ऐतरेय (9) तैत्तिरीय (10) बृहदारण्यक (11) श्वेताश्वतर।

**संदर्भ—(1) तृणानि भूमिः ................** (मनुस्मृतिः)

**मनुस्मृतिः**—यह हमारा प्राचीनतम संविधान (Constitution) है। वहाँ इसमें 12 अध्याय हैं।

**अद्भिः गात्राणि** (बौधयन-धर्मसूत्र) कल्पसूत्र, श्रौतसूत्र, गृह्यसूत्र, शुल्वसूत्र तथा धर्मसूत्र ये प्रसिद्ध सूत्रग्रन्थ हैं। सूत्रग्रन्थों में नीति, सदाचार, शासनव्यवस्था, प्रजा के अधिकार, कर्तव्य, सामाजिक आचार-विचार सामाजिक व्यवस्था इत्यादि विषय हैं।

स्वयं भूखे रहकर भी सेवक को भोजन देना चाहिए। इस प्रकार आदेश आपस्तम्बीय धर्मसूत्र (259) का है। शुल्वसूत्रों में रेखागणित (ज्यॉमेट्री) के सिद्धान्तों का वर्णन है।

(2) **यस्तु सर्वाणि**....................(ईशोपनिषद्)

ईशोपनिषद यजुर्वेद का चालीसवाँ अध्याय है।

(3) **सत्यमेव ज्यति**....................(मुण्डकोपनिषद्)

यह हमारा राष्ट्रीय लक्ष्य भी है (सत्यमेव जयते)

(4) **उत्तिष्ठत जाग्रत**....................(कठोपनिषद्)

यह मन्त्र सब नागरिकों के प्रति आह्वान है। स्वामी विवेकानन्द के द्वारा इसे राष्ट्रीय वाक्य के रूप में स्वीकार किया गया है।

**ख. भावविस्तारः** (भाव-विस्तार)

| समानान्तरसूक्तयः | (समानान्तर सूक्तियाँ) |
|---|---|
| **अहिंसा** | **मा हिंसीः पुरुषं जगत्।** वाजसनेयी सहिंता 16.3 |
| | मनुष्य तथा गतिशील प्राणियों की हिंसा मत करो। |
| **सत्यम्** | **इदम् अहम् अनृतात् सत्यम् उपैमि।** (वाजसनेयी संहिता 1.5) |
| | यह मैं असत्य को छोड़कर सत्य को प्राप्त होता हूँ। |
| **सृनृतावाक्** | **वैश्वानरीं सूनृताम् आरभध्वम्।** अथर्ववेदम् 6.62.2 |
| | सभी के लिये हितकर, प्रिय, मधुर वाणी ही बोलो। |
| | **सत्यं वक्ष्यामि नानृतम्।** अथर्ववेद 4.9.3 |
| | मैं सच ही बोलूंगा, झूठ नहीं। |
| | **सत्येन-उत्तभिता भूमिः।** अथर्ववेदम 14.1.1. |
| | यह भूमि सत्य पर ही टिकी है। |
| **समता** | **सर्वा आशा मम मित्रं भवन्तु।** अथर्ववेद 19.15.6 |
| | सभी दिशाएँ मेरी मित्र हों। |
| | **अपकारिषु यः साधु पुण्यभाक् स उदाहृतः। ब्रह्म पु० 80.59** |
| **अतिथिः** | **अतिथिदेवो भव।** तैत्तिरीय उप. 1.11. |
| | **न कंचन वसतौ प्रत्याचक्षीत।** तै. 3.10. |
| | अपने घर में ठहरे किसी को प्रतिकूल उत्तर न दें। |
| | **आतिथेयं परं तीर्थम्।** महाभारत. अनु. 2.42 |
| | **नातिथिस्तेऽवमन्तव्यः। महाभारत. अनु. 2.46** |
| **गुरुजनाः** | **विनयेन गुरवोऽधिन्तव्याः।** शाङ्करभाष्य, छान्दोग्य 8.7.2 |
| | **गुरुप्रसादात् सर्वं तु प्राप्नोत्येव न संशयः। स्कन्द पुं. 2.78** |
| | **गुरुनिन्दा दहति आयुः। महाभारत. अनु. 104.81** |
| **कर्ममहिमा** | **कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः। ईश. 2** |
| | कार्य करते हुए ही सौ साल तक जीने की इच्छा करे। |
| **आपः** | **आपः सर्वस्य भेषजीः।** ऋग्वेदः 10.137.6 |
| | जल सभी रोगों की दवा है। |
| **चेतना** | **उत्तिष्ठत मा स्वपत।** तैत्तिरीय आरण्यकोपनिषद् 123.2 |

ग. भाषाविस्तारः

(1) आत्मा शब्दः पुंल्लिङ्गे प्रयुज्यते–
एषः आत्मा बलवान् भवेत्।

(2) 'पथिन्' शब्दः अपि पुंल्लिङ्गः।
पन्थाः पन्थानौ पन्थानः इति एवं रूपाणि भवन्ति।

(3) अप् शब्दः स्त्रीलिङ्गे बहुवचने एव प्रयुज्यते-

| | | |
|---|---|---|
| रूपाणि | प्र. | आपः |
| | द्वि | अपः |
| | तृ | अद्भिः |
| | च. | अद्भ्यः |
| | प. | अद्भ्यः |
| | ष. | अपाम् |
| | स. | अप्सु |

(ग) भाषा-विस्तार

(1) आत्मा शब्द पुंल्लिङ्ग में प्रयुक्त होता है; जैसे–यह आत्मा बलवान् होनी चाहिए। अयम् आत्मा बलवान् भवेत्। यहाँ अयम् तथा बलवान् विशेषण पद भी पुंल्लिङ्ग में है।

(2) पथिन् शब्द भी पुंल्लिङ्ग में है। इसके रूप प्रथमा विभक्ति में इस प्रकार चलते हैं–

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | पन्थाः | पन्थानौ | पन्थानः |
| | (एक मार्ग) | (दो मार्ग) | (अनेक मार्ग) |

(3) अप् शब्द स्त्रीलिङ्ग बहुवचन में ही प्रयुक्त होता है। रूप इस प्रकार हैं–**आपः** (प्रथमा), **अपः** (द्वितीया), **अद्भिः** (तृतीया), **अद्भ्यः** (चतुर्थी-पञ्चमी), **अपाम्** (षष्ठी), **अप्सु** (सप्तमी)।

**प्रयोग**–इस जल में = एतासु अप्सु।

सन्दर्भगतसन्धिपरिचयः

**दीर्घसन्धिः** — अकः सवर्णे दीर्घ :।

**ह्रस्व/दीर्घ** — अ, इ, उ, ऋ इति स्वराणां परे यदि क्रमशः एते एव वर्णाः भवन्ति तदा स्वरः दीर्घः भवति।
न + अनृतम् = नानृतम्, च + आत्मानम् = चात्मानम्

**गुणसन्धिः** — अ आ वर्णयोः परे इ ई, उ, ऊ, ऋ, ॠ आगते सति मेलनेन क्रमशः ए ओ, अर् इति भवति।
यथा न + उच्छिद्यन्ते = नोच्छिद्यन्ते।

**यण् सन्धिः** — य् व् र् ल् इति यण् उच्यन्ते।
इ ई, उ, ऊ, ऋ, ॠ परे असमानस्वरे आगते क्रमशः य्, व्, र् इति जायते।

| | | |
|---|---|---|
| यथा– एतानि + अपि | = | एतान्यपि |
| आक्रमन्ति + ऋषयः | = | आक्रमन्त्यृषयः |
| हि + आप्तकामाः | = | ह्याप्तकामाः |
| भूतानि + आत्मनि | = | भूतान्यात्मनि |
| आत्मनि + एव | = | आत्मन्येव |
| अति + अया | = | अत्यया |

सन्धि परिचय

(1) दीर्घ सन्धिः—दीर्घ से दीर्घ स्वर आ, ई, ऊ, ॠ को लिया जाता है। नियम है—अक् (अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, ऌ) से परे सवर्ण (समान वर्ण अर्थात् अ आ/ इ ई/ उ ऊ/ ऋ ॠ) हों तो दीर्घ (आ, ई, ऊ, ॠ) हो जाता है।

न + अनृतम् = नानृतम्। च + आत्मानम् = चात्मानम्।

(2) गुण सन्धिः—ए, ओ तथा अर् को गुण कहा जाता है। अ, आ इन दो वर्णों से परे इनसे भिन्न अर्थात् इ-ई/उ-ऊ/ऋ-ॠ के आ जाने पर मेल के द्वारा क्रमशः ए/ओ/अर् हो जाते हैं; जैसे—न + उच्छिद्यन्ते = नोच्छिद्यन्ते।

(3) यण् सन्धिः—य्, व्, र्, ल् को यण् कहते हैं। इ, ई/उ, ऊ/ऋ, ॠ के परे असमान स्वर आ जाने पर क्रमशः य् व् र् हो जाते हैं। उदाहरण—

| | | | | | |
|---|---|---|---|---|---|
| एतानि | + | अपि | = | एतान्यपि | (इ + अ = य) |
| आक्रमन्ति | + | ऋषयः | = | आक्रमन्त्यृषयः | (इ + ऋ = यृ) |
| हि | + | आप्तकामाः | = | ह्याप्तकामाः | (इ + आ = या) |
| भूतानि | + | आत्मानि | = | भूतान्यात्मनि | (इ + आ = या) |
| आत्मनि | + | एव | = | आत्मन्येव | (इ + ए = ये) |
| अति | + | अया | = | अत्यया | (दुर् + अत्यया = दुरत्यया ) |

## पदानुशीलनी

| | | |
|---|---|---|
| तृणानि (सं.) | (तृणम् नपुं. प्र. बहुव०) | तृणानाम् आसनम्, कुश का आसन; a seat made of grass. |
| भूमिः (सं.) | (भूमि स्त्री प्र. ए. व.) | स्थानम्; स्थानम्; a place (for sitting). |
| उदकम् (सं.) | (उदक नपु. प्र. ए. व.) | जलम्; पानी; water. |
| वाक् (सं.) | (वाक् स्त्री, प्र. ए. व.) | वाणी; बोली; words. |
| चतुर्थी (वि.) | (चतुर् + थ प्रत्यय + ङीप्) | चतुर्थी; चौथी वस्तु; The fourth. |
| सूनृता (वि.) | (सूनृता स्त्री प्र. ए. व.) | सत्या मधुरा च, अनिष्ठुरा; कोमल, मधुर, सत्य तथा प्रिय वाणी; True and pleasant, kind, sincere, courteous (speech). |
| सताम् (वि.) | (सत् ष. ब. व.) | सज्जनानाम्; सज्जनों के, of the gentlemen. |
| गेहे (सं.) | (गेह, नपुं स. ए. व.) | गृहे; घर में; in the house. |
| उच्छिद्यन्ते (क्रि.) | (उत् छिद् कर्म. लृट् प्र. पु. ब. व.) | समुन्मूल्यन्ते; उखाड़ी जाती हैं, दूर की जाती हैं, विनष्ट की जाती हैं; are destroyed, uprooted, thrown away, removed. |
| भूतात्मा (सं.) | (भूतानाम् आत्मा ष. तत्पु.) | मनुष्याणां जीवानाम् आत्मा; मनुष्यों की आत्मा; The soul of the human beings. |
| विततः (वि.) | (वि तनु + क्त पुं. प्र. ए. व.) | विस्तारितः निष्कण्टकः भवति, फैलाया गया है; has been spread over. |
| पन्थाः (सं.) | (पथिन् पुं. प्र. ए. व.) | मार्गः; मार्ग, रास्ता; way, path. |
| देवयानः (सं.) | (देवानाम् यानः ष. त. पु.) | विदुषां मार्गः, विद्वानों का मार्ग; the way great people dwell. |
| आक्रमन्ति (क्रि.) | (आ क्रम् लट् प्र. पु. बहु. व.) | चलन्ति, सततम् अनुवर्तन्ते; निरन्तर चलते रहते हैं; Keep Steadily moving. |
| हि (अ) | | निश्चयेन; निश्चयपूर्वक; indeed, definitely. |

| | | |
|---|---|---|
| आप्तकामाः (वि.) | (आप्ताः कामाः यैः ते बहुव्री.) | यैः ऋषिभिः सर्वे प्रापणीयाः कामाः आप्ताः, इदानीं वीतरागाः; जिन्होंने सभी इच्छाओं को पूरा कर लिया है, ऐसे वीतरागी ऋषिगण; Those sages who have satiated all their desires. |
| निधानम् (सं.) | धाम, निवासस्थानम्; धाम, निवास; | the abode. |
| विजुगुप्सते (क्रि.) | (वि-गुप् सन् लट् प्र. पु. ए. व.) | घृणां कर्तुम् इच्छति; घृणा करना चाहता है; has any feeling of hatred. |
| उत्तिष्ठत (क्रि.) | (उत् स्था लोट् म. पु. बहु. व०) | जडीभूय न उपविशत, सक्रियाः भवत; सक्रिय बनो, अकर्मण्य बन कर मत बैठो Dont sit idle, arise, be active. |
| जाग्रत (क्रि.) | (जागृ लोट् म. पु. बहु. व.) | (वैदिकप्रयोगः, लौकिकसंस्कृते जागृत) अज्ञाननिद्रां त्यक्तवा सचेतनाः भवत; अज्ञाननिद्रा को छोड़कर सचेतन बनो; Leave the deep slumber of ignorance, awake. |
| प्राप्य (अ.) | (प्र आप् ल्यप्) | प्राप्तं कृत्वा, उपगम्य; पहुँच कर, पास जाकर; have approached. |
| वरान् (वि.) | (वर पुं. द्वि. बहु.) | श्रेष्ठब्रह्मज्ञानिनः जनान्; श्रेष्ठ अध्यात्मज्ञान युक्त मनुष्यों के (पास जाकर); (having approached) those who have obtained the knowledge of self. |
| निबोधत (क्रि.) | (नि बुध् लोट्मपु. बहुव.) | जानीत, ज्ञायताम्; जानो, समझो; understand, get to know. |
| क्षुरस्य (सं.) | (क्षुर पुं., ष. ए. व.) | छुरिकायाः; छुरे की; of a big knife (used by barbers). |
| धारा (सं.) | | अग्रभागः; धार; blade. |
| निशिता (वि.) | | तीक्ष्ण; सान पर तराशी गई, पैनी; Sharp. |
| दुरत्यया (वि.) | (दुः अति अया) | पद्भ्यां गन्तुम् अशक्या, जिस पर चला न जा सके; difficult or rather impossible to tread upon. |
| दुर्गम् (वि.) | | दुःखेन सम्पाद्यम्; कठिनाई से प्राप्त; difficult to achieve. |
| पथः (सं.) | पथः (वैदिक प्रयोगः) | पन्थानम्, मार्गम्; रास्ता; way. |
| कवयः (सं.) | (कवि प्र. बहु.) | क्रान्तदर्शिनः कवयः, ऋषयः; बुद्धिमान पुरुष ऋषिगण; Wise person sages. |